② स्वदेशभाषामहिमानुरक्तं
स्वदेशमातुर्यशसा विमुग्धम् ।
स्वदेशवासिप्रगतिप्रसक्तम्
आनन्दरामं पुरुषं महान्तम् ॥3॥

⇒ अन्वयः- स्वदेशभाषामहिमानुरक्तं, स्वदेशमातुः यशसा विमुग्धम्, स्वदेशवासिप्रगतिप्रसक्तम्, आनन्दरामं महान्तम् पुरुषं (भक्त्या नियतं नमामि)।

सन्दर्भः → पद्यमिदं मुकुन्द माधव शर्मणा विरचितायाः स्तुतिप्रशस्तिमञ्जर्याः "आनन्दरामबरुवामहाभागाय प्रणतिः" इति शीर्षकप्रशस्तेः समुद्धृतमस्ति। अत्र आनन्दरामबरुवामहोदयाय प्रणतिः निवेदिताऽस्ति।

व्याख्या :→ स्वदेशभाषामहिमानुरक्तं = स्वस्य = निजस्य, देशस्य = राष्ट्रस्य या भाषा तस्या यः महिमा तेन महिम्ना अनुरक्त अनुरागयुक्तः तं स्वदेशभाषामहिमानुरक्तम्, स्वदेशमातुः = स्वीयराष्ट्रमातुः जनन्याः, यशसा = गौरवेण कीर्त्या वा, विमुग्धम् = मोहितम्, स्वदेशवासिप्रगतिप्रसक्तम् =

Date
15.07.2020

स्तुतिप्रशस्तिमञ्जरी (KS Sir)

निजदेशवासिनां प्रगतौ = विकासे सर्वदा, प्रसक्तम् = यत्नपरं, दत्तावधानम्, आनन्दरामं = एतन्नामकं, महान्त पुरुषं = परमादरणीयं बुधवरम् अहं ग्रन्थकारं मुकुन्द माधव शर्मा, भक्त्या = श्रद्धया, नियतं = सदा, नमामि = प्रणमामि, भूयांसि नमांसि अर्पयामि।

छन्दः→ पद्येऽस्मिन् उपजाति छन्दः वर्तते।

तल्लक्षणं यथा —

अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम॥